C. Swāminātha Gurukkal, Sivacharya
Madras.
Secretary, South India
Archaka Association
Thambu Chetty St.
Madras, 1.

TNo. 189

# ॥ ध्यानश्लोकाः ॥

T.No.189.



T.No 189

# ध्यानश्लोकाः ।


| विषय: | पुट-संख्या |
|---|---|
| 1 देवी ध्यानम् । शिवकामी | 1 to 2 |
| 2 मनोन्मनी , | 3 |
| 3 शिवकामी, वर्द्धनी, वर्द्धनी । | 4 to 5 |
| 4 षड्भुजदेवी , नटेशदेवी, | 5 to 6 |
| 5 देवी , प्राणशक्तिः , | 6 to 7 |
| 6 प्राणशक्तिः । | 7 to 8 |
| 7 वागीश्वरी । | 8 to 9 |
| 8 अष्टभुजदेवी | 9 |
| 9 अन्नपूर्णा, मनोन्मनी, | 9 to 10 |
| 10 कामारी , | 10 to 12 |
| 11 देवसेना , वल्लीश्वरी । सेनानी, सेनानी, | 12 to 13 |
| 12 योगिनी , वल्लीश्वरी , | 13 to 14. |
| 13 भोगिनी , वल्ली . | 14 to 15 |
| 14 सेनानी , अङ्ककाली , | 16 to 17 |
| 15 अङ्काली देवी । | 17 to 20 |
| 16 रेणुके , | 20 |
| 17 चामुण्डी , | 20 to 21 |
| 18 दुर्गा , अष्टभुजदुर्गा . | 21 to 23 |
| 19 कामारी , शक्ति, रेणुके , | 23 |
| 20 दुर्गा, मूकाम्बिके , | 24. |
| 21 महालक्ष्मी , | 24 to 26 |
| 22 पद्मं, मातङ्गी | 26 to 27 |
| 23 मनोन्मनी | 27 to 29 |

| विषय: | पत्र-संख्या |
|---|---|
| २४ सरस्वती, | 29 to 32 |
| 25 अन्नपूर्णेश्वरी, | 33 to 34. |
| २६ ज्येष्ठा देवी, | 34 to 35 |
| २7 सप्तमातृ - ब्राह्मी, | 35 to 36 |
| २8 माहेश्वरी | 36 |
| २9 कौमारी, | 36 to 37 |
| 30 वैष्णवी, वाराही., | 37 to 38 |
| 31 माहेन्द्री, चामुण्डी, | 38 to 39 |
| 32 दुर्गा, | 39 to 40 |
| 33 पञ्चशक्ति, अम्बिके गणाम्बिके, गौरीश्वरी, | 40 to 41 |
| 34 सरस्वती, भूमिदेवी, | 41 to 42 |
| 35 यमुना, महाकाली, | 42 to 43. |
| 36 सप्तकालिका ध्यानम् । | 43 to 52 |
| 37 विशेषतर्पणम् । | 52 to 53 |
| 38 विशेषसन्धिः । | 53 to 61 |

॥ I ॥

C.F.L. माता गौरी पिता शंभो भ्राता स्कन्द विनायक: ।
बान्धवा: शिवभक्ता न: स्वदेशो भुवनत्रयम ॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्त: पत्नी क्षमा पुत्र: षडेते मम बान्धवा: ॥

विशेषसिद्धि देवी ध्यानम ।

1a हरि: ओम । शुभमस्तु ।

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षितम ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम

शुभमस्तु ।

सरस्वती सरसिजके समप्रभा
घनस्वनी कमलविलोलचक्षुषी ।
मनास्विनी भवतु वरप्रसादिनी
॥

श्रीगुरुभ्यो नमः। अविघ्नमस्तु। देवी सहायम्।

न्ति हा

सिन्दूरारुण इन्दुकान्दि वदनं केयूर हरादिभिः

दिव्यैराभरणै र्विभूषिततनुं स्वर्गस्य सौख्यप्रदम्।

अम्भोजाभय शक्तिकुक्कुटधनुं रक्तांगरागांशुकं

सुब्रह्मण्यमुपास्महे प्रणमतां भीति प्रणाशोद्यितम् ॥

श्रीसुब्रह्मण्य गुरवे नमः। श्री सुब्रह्मण्याय नमः।

1a ॥ देवी ध्यानम् ॥

शिवकामी ॥

पाशाङ्कुशा च वरदाभय हस्तधारीं

पीतांबरीं कनकमौक्तिक भूषिताङ्गीम्।

आषोडशाक्षर कलावृत पद्मवासीं

एकाक्षरीं त्रिभुवनादिपतिं नमामि ॥

## मनोन्मनी

कुन्दनिभंवेदकरवह्निनयनं स्यात

पङ्कजवराभयजपाक्षवलयुत्ताम ।

अङ्गहिमभूषण विचित्रवदनं स्यात

तुङ्गमकुटोज्वलमनोन्मनि स्वरूपम ॥ २ ॥

पद्माक्षमालामभयूरुहस्तां

श्यामाङ्गनेत्रां त्रय सुन्दराढ्याम ।

कराण्डकां वासजटेन्दुचूडां

श्रीकामकोष्ठीं शिवशक्तिमीडे ॥ 3 ॥

श्यामां द्विनेत्रां द्विभुजां त्रिभङ्गीं

सव्यापराव्यास्थितकुञ्जिताङ्घ्रिम ।

नीलोत्पलं वा कटकस्तनौ च

लंबन्य हस्ता परमेश्वरी च ॥ 4

॥ 4 ॥

## शिवकामी

श्यामामुत्पलधारिणीं मणिलसत्ताटङ्ककर्णोज्वलां
अक्षाशास्त्रविशारणीं कलरवां कह्लारहस्तार्जनीम् ।
रत्नास्यां सुविलासिनीं वरकरां राजीवनेत्रार्जिनीं
गा
।७ कायत्रीं शिवकामकोष्टनिलयां नृत्तेश्वरस्य प्रियाम् ॥ 5

॥ वर्द्धनी ॥

शम्भुशक्तिसमभङ्गमुच्यते तद्द्विनेत्रप्रकृतिञ्च स्वास्थिलम् ।
लंबमेवकरदक्षिणोत्पलं लज्यभावमनसारवत्नकम् ॥ 6 ॥

## वर्द्धनी

द्विनेत्रां श्वेतवर्णाभां चतुर्भुजसमान्विताम् ।
करण्डमकुटोपेतां हारकेयूरभूषिणीम् ॥
वलयैरङ्गुलीश्चैव यज्ञसूत्रोत्तरीयकैः ।
स्तनौ तु कुङ्कुमालिप्यां कर्णौ वा वदनार्चिताम् ॥

पाशाङ्कुशधरञ्चैव वरदामभयप्रदाम् ।
एवं ध्यात्वा महादेवीं वर्द्धनीं तोयमध्यमे ॥
विन्यसेद्गन्धपुष्पाद्यैः अर्चयेत्तु नमाम्यहम् ॥ 7

षड्जदेवी षड्ज देवी –

श्यामवर्णं त्रिवक्त्रेण समीक्षा षड्जं तथा ।
सर्वाभरणभूषेण सौभाग्यन्तु द्विपादकम् ॥
डाडिमीफलपद्मेन वामसव्येन धारिणीम् ।
अक्षमालाञ्च पाशञ्च अभयं वरदं तथा ॥
इत्येवं ध्यानरूपन्तु अर्चयेन् नमाम्यहम् । 8 ॥

नटेशदेवी- नटेशदेवी ·

द्विभुजाञ्चारुवदनां नेत्रद्वयसमान्विताम् ।
करण्डमकुटोपेतां श्यामनीलाक्लान्विताम् ॥

नितम्बस्तनविस्तीर्णां प्रासार्यैक कराम्बिताम ।
दक्षिणोत्पलकरान्देवीं सर्वाभरण भूषिणीम ॥
दुकूलवसनां देवीं विल्वमाला विभूषिताम ।
श्वेतपद्मासनासीनां देवीं ध्यात्वा नमाम्यहम ॥ 9 ॥

2a देवी-

सिंहोपरि स्थितां पीतां शूलादर्शकरद्वयम ।
करण्डमकुटां देवीं मुक्तादिभिरलङ्कृताम ॥
सर्वालङ्कारसंयुक्तां ध्यात्वा देवीं नमाम्यहम ॥ 10 ॥
रक्तपद्मासनासीनां श्वेतवर्णां स्मितानानाम ।
एकवक्त्राञ्चतुर्हस्तां किरीटमकुटोज्वलाम ॥
पाशाङ्कुशाधराञ्चैवा वरदामभय प्रदाम ।
नितम्बस्तनसंयुक्तां मुक्ताहारविभूषिताम ॥

देवासुरमहं वन्दे ऋषिपत्नि सुपूजिताम् ।

एवं ध्यात्वा महादेवीं ध्यात्वा मन्त्रेण पूजयेत् ॥ ॥

शुद्धस्फटिकसङ्काशां ध्यायेद्देवीं मनोन्मनीं ।

चतुर्भुजां त्रिणेत्राञ्च नीलालकाविभूषिताम् ॥

सुस्मितां चारुवदनां पाशाङ्कुशधरां भजे । ।२॥

देवि शिरदक्षिणमथोत्तर सुपादं

गोमुखमथान्तकृत वारिभुजयुगमम् ।

योनिगतमध्य सह संस्थित सुलिङ्गं

स्थापितसदाशिव मनोन्मनि स्वरूपम् ॥ ।3॥

प्राणशक्ति -

प्राणशक्ति -

रक्ताञ्च रक्तबोधो रविदळ कमलेऽभ्यन्तरे सन्निविष्टं

रक्ताङ्गीं रक्तमौळीं स्मृतिलसुळवहास्मेरुपद्मं त्रिणेत्राम् ।

२b. बीजापूरेक्षुपाशाङ्कुशधनुशरवर कपालान् हस्ते
बिभ्राणां वा लताङ्गीं सकलसुरमहीं प्राणशक्तिं नमामि ॥ १४ ॥

रक्ताम्बो रक्तबोधो लसदरुणदले ब्जादिरूढां कराब्जे
पाशङ्कोदण्डमिक्षु भवमसिमप्यङ्कुशं पञ्च बाणम् ।
बिभ्राणासृक्कपालं त्रिणयनलसिता पीनवक्षोरुहाढ्यां
देवीं बालार्कवर्णां भवतु सुखकरीं प्राणशक्तिं परां नः ॥ १५ ॥

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुरागशोणे ।
पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकमातः ॥ १६ ॥

वागीश्वरी

## ॥ वागीश्वरी ॥

वागी वागेश्वरश्चैव बिन्दुनादमिति स्मृतम् ।
बिन्दुवागीश्वरं प्रोक्तं नादं वागीश्वरं तथा ॥
पञ्चवक्त्रं त्रिणेत्रञ्च चतुर्हस्तं द्विपादकम् ।

श्वेतवर्णमिति ज्ञेयं अभयं वरदं तथा ।

अक्षमालाञ्च वामेन दक्षहस्तेन कूर्चकम् ॥

वागेश्वरेणमेवोक्तं वागीशञ्च ततःपरम् । १७ ॥

अष्टभुज देवी. 3a

॥ अष्टभुजदेवी ॥

धवळवर्ण शरीरसुयौवनं द्विकुचमुन्नतहारविभूषणीम् ।

कनकरत्नविकर्णसुकुन्दळां रजतवस्त्रसुपद्मसुखासनीम् ॥

जयतु शङ्करवामविभागिनीं भवतु शङ्करि पाद नमाम्यहम् ।

आरक्ताभां त्रिणेत्रां मणिमकुटवती रत्नताटङ्करम्यां

हस्तांभोजेषु पाशाङ्कुशमदनधनुस्साधकै र्विस्फुरन्ती ।

आपीनोत्तुङ्ग वक्षोरुह टविल्लुतत्तारहारा नताङ्गीं

आवृतांभोज हस्तां मरुणिनि वसनां ईश्वरीं भावयामि ॥ १९

अन्नपूर्णी

॥ अन्नपूर्णी ॥

हेमाभां वहतीं विलंबिताशिखां मुक्तेन्दुकेशांबरीं
मुक्ताहारविभूषितां कुचभरां कान्ताण्यकाञ्चागुणाम् ।
देवी दिव्यरसान्नपूर्णचषकां मातान्नपूर्णेश्वरी ॥ २० ।

॥ मनोन्मनी ॥

उद्यदिनकराभासां त्रिणेत्राञ्च चतुर्भुजाम् ।
जटामकुटखण्डेन्दु मण्डिताधृतचामरा ॥
वरदाभयहस्ताञ्च शिवाशक्तिकरां भुजाम् ।
गोक्षीरधवळां शक्तिं निशानेन मनोन्मनीम् ॥ २१ ॥

3b एकैक शक्ती परमेश्वरीच भिन्नाश्चतुर्धा विनियोगकाले ।
भोगे भवानी पुरुषेच विष्णुः क्रोधेच काली महिषाच दुर्गा

कामारी- कामारी-

कामारिवामां कमलासनस्थां काम्यप्रदां कङ्कणचूडहस्ताम् ।

कदम्बपुष्पप्रभशोभिताङ्गीं त्रिलोकरक्षायतचक्षुषाङ्गीम ॥2

रक्तपद्मासनमध्यपीठिकां रक्तकुन्तलकर्णवपाटिकाम ।

रक्तवर्णसुधारसवेष्टितां रक्तपद्मदळवर्णसुकान्तिकाम ॥

रक्तपुष्पसुमालितशूलिकां रक्तचन्दनविलेपितदेविकाम ।

श्वेतवर्णशरीरविकासिनीं श्वेतवस्त्रसुधारविलासिनीम ॥

श्वेतपुष्पसुहारविलोचनीं श्वेतपद्मसुखारप्रकाशिनीम ।2

शशिबिंबमुखारविलासिनीं अभयदङ्कुशपाशपरायणीम ।

द्विकुचउन्नतहारप्रकाशिनीं मणिरत्नकिरीटसुधारिणीम ॥

जयशङ्करवामनिवासिनीं जनरक्षणलोकनिवासिनीम । 26 ॥

मनोन्मनी महादेवी शङ्करी अमरांबिका ।

काळी कराळी कङ्काळी कालाग्निकामरूपिणी ॥

कर्णहारकिरीटाङ्गी कटकै कर्णकुन्दळी ।

4a कपालपाणी शूलाङ्गी वराभयगदाधरी ।
शङ्खचक्रधान्वीरूपी खड्गपाशांकुशोज्वलीम् ॥
स्वर्णवस्त्रसुधावेष्णीं सुपुष्पमालकोशीनीम् ।
सर्वालङ्कार शोभिण्यां शङ्करीं प्राणनायकीम् ॥
सर्वलोकैक रक्षिण्यां शङ्करी च नमो नमः ॥ 27

## ॥ देवसेना वल्लीश्वरी ॥

सेनानी -

पीतामुत्पलधारिणीं शशिसुतां दिव्यांबरालङ्कृतां
वामे लंबकरां महेन्द्रतनयां मन्दारमाल्याधराम् ।
देवैरर्चितपादुकां शशिमुखां देवेश वामे स्थिताम्
सेनां दिव्यविभूषणां त्रिनयनां देवीं त्रिभङ्गीं भजे ॥ 28 ॥

सेनानी -

दक्षिणे कुञ्चितं पादं वामपादं प्रलंबितम् ।
उत्पलं सव्यहस्तेन वामहस्तप्रलंबितम् ॥
रक्तवर्णं विशालाक्षीं किरीटमकुटोज्वलम् ।
सर्वाभरणसंयुक्तां देवसेना स्वरूपकम् ॥ 29 ॥

योगिनी

योगिनी वामपार्श्वे तु कुङ्कुमां द्विभुजान्विताम् ।
उत्पलं सव्यहस्तेन लंबितं करकन्तु वा ॥
पद्मासनसमञ्चैव योगिनी ध्यानमाचरेत् । 30 ॥

वल्लीश्वरी -

श्यामामुत्पलधारिणीं मणिलसत्ताटंककर्णोज्वलां
4b. सव्ये लंबकरां किरीटमकुटां तुङ्गस्तनीं कञ्चुकाम् ।
अन्योन्येक्षण संयुतां शरवणोद्भवस्य सव्य स्थितां
कुञ्जामाल्यधरां प्रवाळवदनां वल्लीश्वरीं भावयेत् ॥ 31 ॥

वल्ली-

कुञ्चितं वामपादन्तु सव्यपादं प्रलंबितम् ।
सपद्मवामहस्तेन दक्षहस्तं प्रलंबितम् ॥
हेमवर्णविशालाक्षं स्वर्णवर्ण किरीटिनम् ।
स्तनकञ्चुकसंयुक्तं महावल्ली स्वरूपकम् ॥ ३२ ॥

भोगिनी-

भोगिनी सव्यपार्श्वे तु रक्तवर्णसमान्विताम् ।
कटिदक्षिणहस्तेन श्वेतपद्मन्तु सव्यके ॥
पद्मपीठसमञ्चैव सर्वाभरण भूषितम् ।
स्कन्दस्याकृतिमाख्यातं वारुणीन्तु समर्चयेत ॥ ३३ ॥

वल्ली-

स्कन्दस्य दक्षिणे पार्श्वे वाल्लिकां श्यामकां शुभाम् ।

किरीटमकुटोपेतां द्विनेत्रां युग्मपाणिनीम् ।
पङ्कजं वामहस्तेन कुञ्चितं दक्षहस्तके ॥
प्रासार्य सव्यहस्तेन सुस्थितं सव्यपादुके ।
कर्णे कनकताटंकीं सर्वाभरणभूषिताम् ॥
श्वेतवस्त्रधराञ्चैव श्वेतमाल्यैरलङ्कृताम् ।
बन्धस्तनद्वयोपेतां किञ्चित्प्रहसिताननाम् ॥
इत्येवं ध्यानमेवोक्तं वल्लिकारूपमुच्यते । ३४ ॥
श्यामवर्णां द्विनेत्राञ्च एकवक्त्रां द्विहस्तकाम् ।
नवरत्नकिरीटाङ्गीं वामहस्तेन उत्पलम् ॥
5 a कटकं दक्षिणे हस्ते निरासेन सुधारिणीम् ।
जाजीचंपकमालायां सर्वालङ्कारशोभिताम् ॥
स्कन्दस्य दक्षिणे भागे वल्लिकां भावयेत्ततः । ३५ ॥

सेनानी-

स्ता त्रा
द्विहस्तञ्च द्विनेत्रञ्च द्विपादमेकवक्त्रकाम ।

मुक्तामणिकिरीटाञ्च दक्षहस्तेन उत्पलाम ॥

वामहस्तन्तु कटकां पीतांबरसुधारणीम ।

पारिजातोत्पलां माल्यां स्कन्दस्य वामपार्श्वयोः ॥

ध्यात्वा सेनानिरूपन्तु अर्चयेत्तु नमो नमः । ३६ ॥

भद्रकाळी- भद्रकाळी-

श्यामाभां रक्तवस्त्रां ज्वलनशिखिभुजां अष्टदिग्वा कराश्यां

शूलं भेताळखड्गा डमरुकविहितां वामहस्ते कपालम ।

अन्यद्घण्टा द्विखेटं णलबलसहितं रौद्रभावां त्रिणेत्रां

चामुण्डारूपमेतत त्रिभुवननमितां भद्रकाळीं नमामि ॥ ३७ ॥

ध्यायेत सर्वशत्रुघ्नीं सर्वलोकैकपूजिताम ।

कालीकरालवदनां कालजीमूतसन्निभाम ॥

भीमदंष्ट्रां त्रिणेत्रांशे त्रियीं ज्वालशिखोपमाम ।

अष्टनागाकृताकल्पां अष्टदिक्पूर्णविग्रहाम ॥

तिभुजां सिंहवाहिन्यां एककुंभस्तनावहीम ।

सहस्रभुजदण्डाद्यैः सहस्रायुधशोभिताम ॥

56. बिभ्रतीं किङ्किणीमालां आपादस्थललंबिताम ।

समस्तशत्रुरुधिरां पानोन्मत्तपरां शिवाम ॥

परप्रयुधकामघ्नीं परराजप्रतापिनीम ।

शूलं कपालपाशाञ्च शत्रुप्राणापहारिणीम ॥

एवं ध्यात्वा महादेवीं जपेऽस्मिन सन्निधिं कुरु ।

अंगाळी-देवी-

अङ्काळी देवी-

एकवक्त्रां त्रिणयनां जटाखण्डेन्दुमण्डिताम ।

शूलञ्च परशुञ्चैव हस्तद्वये च धारिणीम् ।
अभयं वरदञ्चैव ध्यायेद्देवीं चतुर्भुजाम् ॥
हास्थिमाला मुण्डमालां माला च नवरत्नकाम् ।
अट्टहासमहाहंसां स्मशाने शोषकारिणीम् ॥
भूतप्रेतपिशाचैश्च ब्रह्मराक्षस दानवीम् ।
कृत्यामाण्डी च कूश्माण्ड सैन्यलक्षा महाबलाम् ॥
रक्तवस्त्रां रक्तवेषां महाशून्यकरां शिवाम् ।
परिचारकलक्षाद्यै महासंहारकारिणीम् ॥
एवं ध्यात्वा महादेवीं मन्त्रनामजपां सुधीम् । ३४ ॥

रक्त.. नी-

एकवक्त्रां द्विनयनां शूलटङ्कस्य धारिणीम् ।
रक्तास्यां रक्तदेहाढ्यां रक्तमाला सुधारिणीम् ॥

जटामकुटसंयुक्तां अट्टहास्य भयाननीम ।
पाददानवघोषाञ्च पार्श्वकोटिगणाश्रिताम ॥
हार्स्थिमाला मुण्डमाला सर्पमाला सुधारिणीम ।
6a. स्मशानभस्मभूषाङ्गीं सर्वराक्षसंहरीम ॥
तस्य भार्या रक्तवेषां रक्तवाससमान्विताम ।
कामाक्षीभरणाघोरां हट्टहाससमान्विताम ॥
एवं ध्यात्वा महादेवीं शत्रुसंहारकारिणीम । 39 ॥
काळीचतुर्भुजाञ्चैव नीलवर्णस्वरूपिणीम ।
शूलं कपालहस्ताञ्च अन्ये डमरुपाशकम ॥
ऊर्ध्वकेशसमायुक्तं रौद्रदृष्टि भयानकम ।
आसीनं वा स्थितं वापि भद्रकाळीस्वरूपकम ॥ 40 ॥
श्यामाभां रक्तवस्त्रीं ज्वलितशिखभुजां अष्टहस्ताकराब्जां

शूलं वेतालखड्गं डमरुकसहितां वामभागे वहन्तीम् ।
नागं पाशञ्च घण्टां मनलकरयुतां सव्यभागे वहन्तीं
चामुण्डारूपमेतत् सकलवशिकरीं भद्रकाळीं नमस्ते ॥ 41

रेणुके

## ॥ रेणुके ॥

अरुणकिरणवर्णां अग्निकेशां करण्डं
डमरुकधर शूलं खड्गहस्तं कपालम् ।
अनलनयननागं वीरसिंहासनस्थं
अखिलभुवनमाता रेणुकादेविमीडे ॥ 42 ॥

रक्तवर्णशरखण्डखड्गिनीं हस्तशूलकपाल डमरुकाम् ।
शूलपाशमुसलखड्गधारिणीं रेणुकादेवी मुपैति मुपास्महे ॥ 43 ॥

चामुण्डी -

6b चतुर्भुजां त्रिणेत्राञ्च काळमेघस्वरूपिणीम् ।

दंष्ट्राकराळवदनीं व्याघ्रचर्मांबरान्विताम् ।
कटके शूलहस्तञ्च कपालवरदां शुभाम् ॥
किङ्किणीमालया भूष्यां प्रेतवाहनरूपिकाम् ।
सर्वासां शिवशक्तीनां स्तनौ पीता सुयौवना ॥
ध्यायेत् शक्तिमिदं ध्यात्वा चामुण्डाकृति भावयेत् ॥ 45 ॥

चामुण्डी -

रक्ताभां पीतवस्त्रां स्थितिमुखकमलां इन्द्ररेखावतंसां
दिव्यैर्माणिक्ययुक्तां मणिगणखचितां भूषणैः पुण्डरीकाम् ।
सुपुष्पैर्भासमानां रिपुकलसुभुजां बिल्वपत्रायताक्षीं
चामुण्डा स्तूनि मुण्डिं रिपुकुलमथनीं शङ्करीं भावयामि ॥ 46

दुर्गी - दुर्गी -

सवस्त्रन्नीलकेशञ्च नीलोत्पलदळाकृतीम् ।

स्वासितिनीं चारुवदनीं सर्वाभरणभूषिताम् ।

शङ्खचक्रञ्च दधतीं दक्षिणेनाभयप्रदाम् ॥

ऊरुवामभुजां देवीं दैत्यसंहारकारणीम् ।

कुचबन्धसमायुक्तां महिषस्य शिरास्थिताम् ॥

आवरणेन तु संयुक्तां दुर्गां ध्यात्वा नमाम्यहम् ॥ 47 ॥

अष्टभुज दुर्गा-

एकवक्त्रां शिरोज्वालां रक्तनेत्रां भुजाष्टकाम् ।

नीलवर्णसमायुक्तां घोरदन्तं तथैव च ॥

महिषस्य शिरस्थाने दक्षे पादधृतोन्नकाम् ।

7a महिषस्य कटिस्थाने वामपादं तथोद्धृतम् ॥

महिषस्य च वक्षेण त्रिशूलाग्रं तदुद्धृतम् ।

द्विहस्तश्चैव शूलेन कपालं खड्गमेव च ॥

धनुर्बाणसमायुक्तं गदाश्चक्रं तथैव च।
वामसव्यद्विपार्श्वेन हस्ताग्रे आयुधान्यसेत ॥
सर्वाभीतिश्चालंकारीं ध्यात्वा दुर्गां नमाम्यहम। 48 ॥

कामारि शान्ति -

कामारी-

श्यामाभां रक्तवस्त्रां द्विनयनज्वलशिखां अष्टवेदी कराग्रे
शूलं वेतालखड्गं डमरुकसहितं वामहस्ते कपालम।
अन्ये खेटञ्च पाशं हलगतसहितं रौद्रमुन्मत्तरूपम ॥
कौमारीं रूपमेतत त्रिभुवनवशिकां शङ्करीं भावयामि ॥49

रेणुके

पाणीपद्मकपालशूलमितरं खड्गं गुणाडिण्डिमं
बिभ्राणां करपङ्कजैः त्रिनयनं नागाष्टभूषोज्वलम।
नानाकोटियुगान्तभास्करनिभं नाना लसद्भूषणीम ॥
दक्षालंबितपादनिन्दितपदं श्रीरेणुकामाश्रये ॥ 50 ॥

दुर्गाम् -

हेमप्रख्यामिन्दुखण्डार्धशौम्यां

26 शङ्खारिष्टं भीमहस्तां त्रिणेत्राम् ।

हेमाब्जस्तां पीतवस्त्रां प्रसन्नां

देवीदुर्गां शरणमहं प्रपद्ये ॥ ५१ ॥

मूकाम्बिक

मूलांभोरुहमध्यकोणविलसत् बन्धूकरक्ताज्वलां

ज्वालाज्वालविदेहकान्तलहरीमानन्दसन्दायिनी ॥

हेलालालितनीलकुन्दलधरां नीलोत्तरीयांशुकां

कोल्लूरापुरिवासिनीं भगवतीं ध्यायामि मूकांबिकाम् ॥ 52

महालक्ष्मी ॥ महालक्ष्मी ॥

वामदक्षिणहस्ताभ्यां दधतीं श्रीफलांबुजे ।

हेमाभां सघटेहाभ्यां प्लाव्यमानां महाश्रियम् ॥ ५३ .

द्विनेत्रां कुङ्कुमाकारां एकवक्त्राञ्चतुर्भुजाम् ।
किरीटमकुटञ्चैव नितंबस्तनसंयुताम् ॥
स्वर्णमाभरणै र्युक्तां श्वेतवस्त्रसुधारिणीम् ।
श्वेतपद्मासनां देवीं द्विभुजां श्वेतपद्मिनीम् ॥
अभयं वरदञ्चैव सर्वाभरणभूषिणीम् ।
सर्वदारिद्र्यशमनीं ध्यात्वा लक्ष्मीं नमाम्यहम् ॥ 54 ॥
चतुर्भुजां द्विनेत्राञ्च सरत्नमकुटान्विताम् ।
8a पीतवस्त्रसमायुक्तां सर्वाभरणभूषणीम् ॥
पङ्कजं दक्षिणे हस्ते श्रीफलं वामहस्तके ।
अभयं वरदञ्चैव हस्तद्वय द्विपार्श्वयोः ॥
गजद्वयघटोपेतं वामदक्षिणपार्श्वयोः ।
धारयेणाभिषेकञ्च ध्यात्वा देवीं नमाम्यहम् ॥ 55 ॥

या सा पद्मासनस्था विपुलकटितटा पद्मपत्रायताक्षी
गम्भीरावर्त्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुंभैः
नित्यं सा पद्महस्ता मम वसति गृहे सर्वमङ्गल्ययुक्ता ॥

॥ पद्मम ॥

माणिक्यसदृशं कन्दं नाळं नीलसमप्रभम ।
अङ्कुरन्तु प्रवाळाभं दळं रजतसप्रभम ॥
केसरे हेमवर्णाभं अग्रे मुक्तावळीयुतम ।
तन्मध्ये जननीं लक्ष्मीं पद्मवर्णानि भावयेत ॥ 57 ॥
शुक्लमाल्यांबरधरां शुक्लगन्धानुलेपनाम ।
वामजानुन्यस्तकरां चिन्मुद्रा दक्षिणे करे ॥
पद्मपीठसुवासिन्यां सर्वालङ्कार शोभिनीम ।

शं वां
परा निष्कळकां देवीं ध्यात्वा रूप नमो नमः। 58 ॥

शुक्ल वस्त्रपरिलेपन भूषां चन्द्रमौळिमिति शुभ्रशरीराम्।
हस्तपोस्तक सुधाकट वीणां मालिकामहमहं कलयेवम् ॥5

मातङ्गी

## मातङ्गी -

ध्यायेहं रत्नपीठे शुककलपरितं श्रीवतीं श्यामगात्रीं
न्यस्तैकाग्रे सरोजं शशि कलधरं वल्लकीं वादयन्तीम्।
कल्हारां पीतमालां नियति विलसत चूलिकां रक्तवस्त्रां
मातङ्गीं भूषिताङ्गीं मधुमदवसां चित्ररोद्भासि बालाम् ॥6

## मनोन्मनी

महतहमार्गेमन्ये मातृकादिव्यरूपे
सहवहासि जनैस्त्वां सर्वमन्त्र प्रकाशे।
महदहमार्गेमन्ये मनोन्मनी सूतविद्ये
स तु भवि परिताहिं सुन्दरी त्वन्नमामि ॥. 61 ॥.

अरुणकिरणजालै रञ्चितस्सावकाशां

विधृतजपवटीकां पोस्तकाभीति हस्ताम् ।

इतरवरकराढ्यां फुल्लकल्हार हस्तां

निवसतु हृदि बालां नित्यकल्याणशीलाम् ॥ 62.

श्रीशक्तिलक्ष्मीं नवहेमवर्णां कुम्भांबपाशांकुशचापबाणैः ।

1a अलङ्कृतादोर्ध्वकरां जिषट्के ऋऋक्कगन्धांबरमाल्यशोभाम् ॥

पीतारुणाभां द्वयशोभमानां पाशावराभीति परस्वध्यानि ।

करैर्दधानां शशिखण्डचूडां त्रिलोचनामार्त्तमहेशरूपाम् ॥64.

धवळवस्त्र सुगन्धविलेपनां

भुजयुगावृत पोस्तकमालिकाम् ।

शशिकलाकलितं अमृतेश्वरी

कलितकामदुघां कलये हृदि ॥

बालभानुसहस्राभां रत्नांबरविभूषणीम ।
पाशाङ्कुशवराभीति हस्तां रत्नेश्वरीं भजे ॥ ६६ ॥
विचित्रवस्त्रांबरणांगरागां स्फुरत्नवर्णां सुरसीतपूजाम ।
माणिक्यदर्वीमितरे सुवर्णां पात्रासु दुग्धां स्मरसंपदान्ति ॥
हे लोकपालं मुसलं परञ्च भुजैर्दधानामिति नीलवर्णाम ।
दंष्ट्रोज्वलड्डोल मुखीं त्रिणेत्रां मण्डसृगालंबितमौलिमौडे ॥

सरस्वती

## सरस्वती

शुद्धस्फटिकसङ्काशीं रविबिंबसमप्रभाम ।
कुन्देन तु हिताभासां हंसनाभगतां शिवाम ॥
मुक्ताहारविभूषञ्च देवीं ध्यायेच्चतुर्भुजाम ।
अक्षसूत्राङ्कुशधरीं हस्ते पोस्तकधारिणीम ॥
सितेन दर्पणाभेन वस्त्रेण परिभूषणीम ।

॥ ॐ ॥

१८ सरस्वतीं वेदिमध्यान्तां चन्द्रार्धकृतशेखरीम् ।
जटाकपालसंयुक्तां पूर्णचन्द्रनिभाननीम् ॥
कटकैः स्वर्णरत्नाद्यैः वलयैश्च विभूषिताम् ।
केयूरैर्मेखलाद्यैश्च द्योतयन्तीं जगत्त्रयाम् ॥
कंबुग्रीवां सुताम्रोष्ठीं सर्वाभरणभूषणीम् ।
त्रिलोचनीं सरस्वत्यां स्वर्णनूपुरभूषणीम् ॥
शब्दब्रह्मरूपिणीं ध्यायेत ज्ञानकामसमाहिताम् । ६१ ॥
अर्चयिष्ये जगन्मातां शारदां द्विशतप्रभाम् ।
सितपद्मासनां देवीं त्रिणेत्रं शशिभूषणीम् ॥
श्वेतवस्त्रां चतुर्हस्तां नवरत्नकिरीटिनीम् ।
पोस्तकाक्षाभयञ्चैव रक्तोत्पलं तथैव च ॥
ध्यात्वा भारतीरूपं अर्चयित्वा नमोस्तुते ।

चतुर्भुजां त्रिणेत्राञ्च श्वेतवर्णां तथैव च ।

अक्षमालाञ्च सव्येन पोस्तकं वामहस्तके ॥

सव्यहस्तेन पद्मञ्च वामहस्तेन कुण्डिकाम् ।

10 a मुक्ताहारविभूषञ्च सर्वालङ्कारभूषणीम् ॥

सर्वलोकैकवश्येन सरस्वतीं प्रपूजयेत् । ७१ ॥

श्रीमत् चन्दनचर्च्चितोज्वलवपुः शुक्लांबरामल्लिका-

मालालालितकुन्दलाप्रविलसत् मुक्तावली भूषणा ।

दिव्यज्ञाननिदाघपोस्तकधरा रुद्राक्षमाला धरा

वाग्देवी वदनांबुजे वसतु नः त्रैलोक्यमाता चिराम् ॥७२॥

विद्यात्मानमनेकलोकजननीं देवीमिमामीषतां

श्रीवित् कल्प विभूषितां त्रिनयनां वन्दे कावेद्यां सदा ।

भक्त्या नाम सुरासुरेन्द्र मकुटां प्रत्युप्तरत्नाङ्कुरां

छाया रञ्जित पाद पीठ निकरा मिष्टं मिमांसासनीम् ॥७३

या कुन्देन्दुतुषारहारधवळा या शुभ्रवस्त्रावृता

या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।

या ब्रह्माच्युतशङ्करप्रभृतिभिः देवी सदा पूजिता

106. सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥74

ना

दोर्भिर्युक्ता चतुर्भिस्स्फटिकमणिमयीमक्षमालां दधानां

हस्तेनैकेन पद्मं सितमपि च शुकं पोस्तकं चापरेण ।

भासा कुन्देन्दुशंखस्फटिकमणिनिभा भासमानाऽसमाना

न्ना

सा मे वाग्देवि देवीं निवसतु वदने सर्वदा सुप्रसन्नाम् ॥75

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावतंसां

ज्योतिर्मौळीं त्रिणेत्रां विविधमणिलसत्कुण्डलां पद्मकान्तां ।

हारग्रैवेयकाञ्चीं गुणमणिवलयोद्यद्विचित्रांबराढ्यां

अंबा पाशाङ्कुशाये अभयवरकरां अंबिकां तन्नमामि ॥76

अन्नपू-
र्णेश्वरी

## अन्नपूर्णा ।

उद्यत्सहस्रद्युतिबिंबगौरां मुक्ताङ्गवीणां स्तनलंबहाराम् ।
माणिक्यदर्वीं मधुपात्रहस्तां स्मरन्ति सन्तः स्मरवैरि-
कान्ताम् ॥ 77

हेमाभां शुक्लवसनां पद्मद्वयवराभयाम् ।
हास्थि हस्तोद्यत स्वर्णा कुंभामृतपरिभृताम् ॥

॥a सर्वालङ्कृतशोभिन्यां लक्ष्मीं ध्याकाङ्क्षारीण्णम: । 78 ॥

पाशाङ्कुशवराभीति - हस्तां त्रिणयनां शुभाम् ।
रक्तमाल्यांबरधरां रक्तवस्त्र सुधारिणीम् ॥
रक्तवर्णपरं ज्योति र्नमामीत्या भजामहे । 79 ॥

सुवर्णप्रभान्यां सुरत्नापि भूषां
परं मातुलुङ्गां परञ्चोद्विहन्तीम् ।
सुरलेश्वरीं सिद्धलक्ष्मीं समाख्यां
भजे चित्रवस्त्रां सुलेपातिरम्याम् ॥ 80

पुन्नागांबुज जाजिचंपकबकुळैः पुष्पैरलंकारिताम्
धन्वीमिक्षुधनुप्रभा सुशिरसां पाशाङ्कुशौ बिभ्रतीम्।
मध्ये प्रोद्यदनन्तभोगिनिलये कल्पोदरीये शिवे
नादे नादरसस्य रूपनवभिः हार्दैस्सवेयांबिका ॥ ८१ ॥
जाजिनीलोत्पलबकुलचंपकैः श्वेतरक्तांबुजपुन्नमाल्लिकाम्।
हारमाल्यरुद्रशोभितलंकृतां श्वेतगन्धसुलेपनभूषिताम् ॥
पाशाङ्कुशवराभयधारिणीं देवदेवसुरदेवपूजिताम् ॥ ८२ ॥

ज्येष्ठा देवी-

ज्येष्ठा देवी-

कन्यापूतसमायुक्तां खार्जकाकध्वजान्विताम्।
रक्तवर्णधरां देवीं मुक्ताहारविभूषिताम् ॥
काकीच वाहनञ्चैव सर्वालङ्कारशोभिताम्।
कालिपत्नीं तथा कृत्वा ध्यात्वा मन्त्रमिति स्मरन् ॥

काकध्वजकरां रूपीं काले पतिसुखासने ।
पार्श्वयोस्तनया पुत्रो माणिश्च वृषनायकः ॥
रत्नवर्णवराहस्यो वृषाभ तु निभामाणि ः ।
वृषन्तु दक्षिणे पार्श्वे वामपार्श्वे माणिं तथा ॥
सर्वालङ्कारसंयुक्तां कालिपत्नी नमो नमः । ८५ ॥

सप्तमातृ - सप्तमातृ-ब्राह्मी ।

ब्राह्मी चतुर्मुखीञ्चैव पीतवर्णभुजाष्टकाम् ।
अष्टनेत्रसमायुक्तां हंसवाहनसंस्थिताम् ॥
किरीटमकुटञ्चैव वज्रकुन्दळमेव च ।
पीतांबरधरञ्चैव पीतश्छत्रसुशोभिताम् ॥
अभयं वरदञ्चैव अक्षमालान्तु कुण्डिकाम् ।
12a वज्रमाभरणञ्चैव सर्वालङ्कारशोभिताम् ॥

इत्येवं रूपमाख्यातं ध्यात्वा ब्राह्मीस्वरूपकम् । ८५॥

माहेश्वरी--

पञ्चवक्त्रसमायुक्तां दशबाहुसमन्विताम् ।
नेत्रपञ्चादशञ्चैव पञ्चवर्णसमप्रभाम् ॥
कपालमङ्कुशञ्चैव दण्डञ्च दिनमुद्रिकाम् ।
जटामकुटसंयुक्तां नागाभरणभूषिताम् ॥
श्वेतांबरधराञ्चैव श्वेतच्छत्र सुशोभिताम् ।
वृषवाहनसंयुक्तां सर्पकुण्डलधारिणीम् ॥
त्रिशूलमभयं खड्गं डमरुं पाशसव्यके ।
वामे अग्निकपालञ्च वरदं खेटमङ्कुशम् ॥
सर्वाभरणसंयुक्तां ध्यात्वा माहेश्वरीं तथा । ८६ ॥

कौमारी -

कौमारीं रक्तवर्णाञ्च षड्वक्त्रां भानुनेत्रकाम् ।

द्विषड्भुजसमायुक्तां मयूरवाहनां तथा ॥

रक्तांबरधराञ्चैव रक्तच्छत्र सुशोभिताम् ।

शक्तिं चक्रधरञ्चैव खड्गपाशाभयं तथा ॥

कुक्कुटं कुलिशं खेटं वरदाधनुरङ्कुशम् ।

स्वर्णमाभरणञ्चैव सर्वालङ्कार शोभनीम् ॥

12b कौमारीं ध्यानरूपन्तु ध्यात्वा मन्त्रेण पूजयेत् । ४७ ॥

वैष्णवी -

कृष्णवर्णां द्विनेत्राञ्च एकवक्त्रां चतुर्भुजम् ।

कृष्णपीतांबरञ्चैव गरुडासन संस्थिताम् ॥

कृष्णच्छत्र सुशोभाढ्यां मुक्ताहारविभूषणीम् ।

हेमकुन्दळकर्णेन शङ्खचक्रगदाभयम् ॥

सर्वालङ्कारसंयुक्तां सर्वाभरणभूषिताम् ।
एतद्वैष्णवि रूपन्तु ध्यात्वा मन्त्रेण पूजयेत् ॥ ८९ ॥

वाराही -

वक्त्रं वराहरूपन्तु नीलवर्णं चतुर्भुजम् ।
अश्ववाहनसंयुक्तं नीलच्छत्रसुशोभनीम् ॥
नीलांबरधराञ्चैव नीलरत्नेन भूषिताम् ।
शलाकदण्डमेवन्तु खड्गखेटकमेव च ॥
भूमिपादाळभे नित्यां सर्वालङ्कारशोभिताम् ।
वाराहीन्तु ततः कृत्वा ध्यात्वा मन्त्रेण पूजयेत् ॥ ९०

माहेन्द्री -

इन्द्राणीं हेमवर्णाञ्च एकवक्त्रां चतुर्भुजम् ।
ऐरावतगजारूढां श्यामच्छत्रसुशोभिताम् ॥

स्वर्णमाभरणै र्युक्तां सहस्रनयनान्विताम् ।
13a वज्रं शक्तिं गदां खड्गं सुरत्नमकुटोज्ज्वलाम् ॥
रत्नताटंकसंयुक्तां ध्यात्वा देवीं महेन्द्रिकाम् । 61

चामुण्डी ।

दंष्ट्रीञ्च वदनाञ्चैव त्रिणेत्रञ्च भुजाष्टकम् ।
व्याघ्रवाहनसंयुक्तां मेघवर्णशरीरिणीम् ॥
नीलच्छत्रसुशोभाढ्यां सर्पाभरणभूषिताम् ।
कर्णेन स्वर्णताटङ्कौ स्वर्णबन्धनसंस्थिताम् ॥
जटाजूटकिरीटञ्च कण्ठमालासुधारिणीम् ।
अभयं त्रिशूलकटकं खड्गञ्च दक्षिणे करे ॥
पाशं कपालघण्टाञ्च खेटकं वामपार्श्वके ।
सर्वालङ्कारसंयुक्तां चामुण्डीध्यानरूपकम् । 62 ॥

दुर्गी-

शङ्खचक्राभयोरस्तं नववस्त्रमहाबलाम ।
सिंहारूढसमं पादं महिषासुरमर्दनीम ॥
अभयवरदहस्तं अङ्कुशं पाशहस्तं
कनकमणिकिरीटं कुण्डलं वीरशालिम ।
सकलाभरणभूष्यां धर्मकामाक्षि देवीं
शिवसुमङ्गळका विश्वयोनिं भजामि ॥ 63 ॥

पञ्चशक्ति-

॥ पञ्चशक्ति - अम्बिके ॥

13b टङ्कमेणधरञ्चैव अभयं वरदं तथा ।
सर्वालङ्कारसंयुक्तां समपादञ्च आम्बिकाम ॥ 64

गणाम्बिके

ऊर्ध्वे सूर्यार्द्धचन्द्रञ्च अभयं पत्रवरं तथा ।

एकवक्त्रं त्रिणेत्रञ्च गङ्गापादसमा भवेत्।
अभयं वरदञ्चैव पाशाङ्कुशंधरस्य च ॥
सपादञ्च त्रिणेत्रञ्च एकवक्त्रं गणांबिका। 65 ॥

गौरीश्वरी -

अंभोजपवटञ्चैव अभयं वरदं तथा।
एकास्यं समपादञ्च गौरी शक्ति स्वरूपकम् ॥ 66 ॥

सरस्वती ॥

कुण्डिका पोस्तकञ्चैव अभयं वरदं तथा।
अम्भोजपुष्पमध्ये तु समपादा सरस्वती ॥ 67 ॥
पाशाङ्कुशाभयपरा समपादं तथैव च।
कुचोन्नतञ्च गम्भीरं विष्णु आत्मसु शक्तिषु ॥ 68.
दिव्यपाशाङ्कुशञ्चैव पोस्तका सूचिहस्तयो:।

T. 189



समपाद्महाग्रीमां क्रह्मा आत्मस्वरूपिणीम ॥ 69 ॥

भूमि देवी-

## भूमिदेवी.

आवाहयेत्ततो भूमिं सर्वाभरणभूषिताम ।

द्विभुजाञ्च द्विनेत्राञ्च करण्डमकुटान्विताम ॥

हेमयज्ञोपवीताञ्च पीतनेत्रां सुयौवनाम ।

14a पीताञ्च पीतवस्त्राञ्च पुण्डरीकदळेक्षणाम ॥

कृताञ्जलिपुटो वापि चोत्पलालंबितं भुवा ।

भूमिदेवी स्वरूपायां सर्वाभरणसुन्दरीम ॥ 100 ।

यमुना -

चतुर्भुजां त्रिणेत्राञ्च कपालं शूलमेव च ।

दक्षिणे भयटङ्कस्य वामपार्श्वे समन्वितम ॥

जटामकुटसंयुक्तं नागयज्ञोपवीतिनम ।

तस्यैव दक्षिणे पार्श्वे यमुनाञ्चैव कारयेत ॥ 10 ॥

## महाकाली

द्विभुजा च द्विनेत्रा च श्यामवर्णसमान्वितम ।
कूर्मासनसमायुक्तां सर्वाभरणभूषितम ॥
पूर्णकुंभस्य वामे तु उत्पलं सव्यहस्तके ।
यमुनायां स्वरूपन्तु सर्वावयवसुन्दरीम ॥
द्वारस्य वामभागे तु महाकाली यमुनास्तथा ।
यमुनाञ्च महाकालीं तस्य वामे तु पूजयेत ॥

शुभमस्तु । श्रीगुरुभ्यो नमः ।

14b

## ॥ सप्तकन्निका ध्यानम ॥

ध्यायेत्कराळवदनां तप्तकाञ्चनसन्निभाम ।
षट् सखीभिश्च संयुक्तां करद्वयविराजिताम ॥

पाषाणैकनिलयां नित्योत्सवसमान्विताम् ।
पूजनीयां महादेवीं कन्यकापरमेश्वरीम् ॥
15a सान्तरे भू महामाया बिन्दुनादसमान्वितम् ।
मनोन्मन्या मनश्चायां हस्तानेकन्तु युग्मनि ॥
गौरी मन्त्र इति प्रोक्तस्सविसर्गौ तु वामनौ ।
वान्तं रे भूमयाया विष्णवीशाभ्यां युतो मनुः ॥ ?।
अष्टवर्गत्रयाणान्तु चतुर्थस्वरसंयुतम् ।
बिन्दुनादशिखामात्रं देवीबीजमिदन्तु वा ॥
ऐकारक्लीं समायुक्तं सौकारबिन्दुनादयुक् ।
मन्त्रोयं हंससंयुक्तं स्त्रीबीजञ्च मनुर्भवेत् ॥
एवञ्चतुर्मन्त्र दैव्यः सनातन इति स्मृताः ।
एवं मूलमन्त्रप्रोक्तां तास्मिन् ब्रह्माङ्गकल्पना ॥

हृत्पुटाजातमूलौ तु मूर्तिध्यानमनुस्मृतौ ।
आदिशक्ति मनुर्वापि मूलमन्त्र इति स्मृताः ॥
एवं मन्त्रः समादिष्टः प्रतिष्ठित त उच्यते ।
16 a वर्णांशांगुलमुच्छ्रयं प्रियकरं शास्त्रप्रमं शिल्पिषु
लोकादित्यवतारनागसरसं दीपं रथं गोपुरम् ।
अष्टायां वलयस्य षोडशदळं तद्बाह्यनागं दळम्
पश्चात्कोण विलिख्य शक्ति निलयं संपूर्णमेरुं क्रमात् ॥
उत्तमं पूर्णमेरु स्यात् अर्धमेरुश्च मध्यमम् ।
कृशरं सर्वव्याधिश्च स्थूलश्चैव दरिद्रता ॥
वक्रश्च मारणं प्रोक्तं समं सम्यक् फलं भवेत् ।
लिङ्गनिग्रहमेतेषां यत्र यत्र तथैव च ॥
श्रीचक्रोद्धारणं कृत्वा आचार्याद्शिल्पिदुर्लभम् ।

चक्रमाद्यौ लिखेन्मन्त्री नवरेखा क्रमेण तु ।

नवग्रहसमारश्य गुरुमारश्य रेखयेत ॥

गुरुमङ्गाररेखायां शनिवृत्तस्य रेखयो: ।

केतुं बुधस्य रेखायां मङ्गलं वृत्तरेखयो: ॥

राहुं बुधस्य रेखायां केतुं आदित्यरेखयो: ।

गुरुश्चन्द्रस्य रेखायां नवरेखाक्रमेण तु ॥

देवीस्तु भूमे र्गङ्गावत. स्तुते तु प्रशस्यते ।

तु 6, तो, 6, मे, 5, ग 3, गा 3, वा 4, लि 3, त 6, ते 6, ।

मन्त्रश्चाद्यञ्च विद्वान्तं सृष्टिस्थिति विधिक्रमात ।

66 बिन्द्वाद्यं अन्तमन्त्रश्चं संहारस्य विधिक्रमात ॥

लिङ्गविष्णुञ्च शक्तिश्च चक्रं यन्त्राधिदेवता ।

अशास्त्रं शकटं भिन्नं पुनस्थापनमाचरेत ॥

श्रीचक्रो स्थापनाचार्यं शिल्पिद्वयञ्च दुर्लभम् ।
सृष्टिस्थित्योत्तमञ्चैव सर्वं सफलमेव च ॥
शिखोत्तमं कुर्यात् उराश्शिरपदाधमम् ।
पादादि अधमं कुर्यात् शिल्पिमार्यं बुद्धिमान् ॥
यजमानं नृपग्रामं आचार्य।श्शिल्पि साधकम् ।
सर्वं सफलवृद्धिं स्यात् विशालस्य सुरालयम् ॥
षण्णवत्यङ्गुळं पीठं विस्तारं तत्समं भवेत् ।
चतुरं द्वादशाङ्गुळयं गोमुखेन विधीयते ॥
तस्य मध्योच्छ्रयञ्चैव शतमर्धाङ्गुलं भवेत् ।
एकस्यैव महाशैलं सर्वलक्षण संयुतम् ॥
हस्तचातुर्य शास्त्रज्ञः नेत्रसूत्रविचक्षणः ।
द्वात्रिंशत् चक्रकोणं स्यात् वत्सरं शतमर्धके ॥

तत्वज्ञानमहात्मस्य चक्रनिर्मितिशिल्पिषु ।
वेदशास्त्रागमज्ञेय बुद्धिमान् देशिकोत्तमः ॥
द्वयेन संयुतश्चैव सर्वत्र शुभदा भवेत् ।

श्रीगुरुभ्यो नमः ।

17a देवीसन्निधिं पञ्चगव्यं स्थापनघटिका कुंभस्नपनं वि-
धाय, अष्टाङ्गुळ (दशा) विस्तारं समचतुरश्रं कृत्वा, नवकोष्ठं
विधाय, श्रीं, क्लीं, यं, यीं, इं, हौं, पें, क्लीं सौं इति नवा-
क्षरमध्यपूर्वादि प्रदक्षिण क्रमेण लिखेत् । ओं ह्रीं पृथि-
वीतत्वकोष्ठायै नमः । ओं ह्रीं अप्सु तत्वकोष्ठायै नमः
दक्षिणे ओं ह्रीं तेजोतत्वकोष्ठायै नमः । पश्चिमे ओं
ह्रीं वायुतत्वकोष्ठायै नमः । उत्तरे ओं ह्रीं आकाश-
तत्वकोष्ठायै नमः । इति कोष्ठं संपूज्य पात्राणि पूजयेत्

ओं ह्रीं ब्रह्मपात्रायै नमः। पूर्वे ओं ह्रीं विष्णुपात्रा-
यै नमः। दक्षिणे ओं ह्रीं रुद्रपात्रायै नमः। पश्चिमे
ओं ह्रीं महेश्वरपात्रायै नमः। उत्तरे ओं ह्रीं सदाशि-
वपात्रायै नमः। मध्ये- इति पात्रं संपूज्य। क्षीरदधि
घृत गोजल गोमयं निक्षिप्य द्वयङ्गुलविस्तारं त्रिया-
17b ङ्गुलोच्छ्रय प्रमाणञ्चात्र पूर्णात्रिभौ अध्वपादं निक्षिप्य
ओं ह्रीं गौरीमिमाय + व्योमान्निति मन्त्रं इत्यादि एक-
द्वयत्रयचतुः पञ्चवारं अभिमन्त्र्या। अनलनिर्ऋति वायु
ईशकोणेषु। ओं ह्रीं मनस्तत्वकोष्ठायै नमः। अग्ने ओं
ह्रीं बुद्धितत्वकोष्ठायै नमः। नैर्ऋते ओं ह्रीं हंकारतत्व-
कोष्ठायै नमः। वायव्ये- ओं ह्रीं चित्ततत्वकोष्ठायै नमः।
ईशाने- इति कोष्ठं संपूज्य, पात्रं पूजयेत्। ओं ह्रीं

इन्द्रपात्रायै नमः। आग्नेये- ओं ह्रीं शान्तपात्रायै नमः।
नैऋते ओं ह्रीं देवपात्रायै नमः। वायव्ये ओं ह्रीं
ईश्वरपात्रायै नमः। ईशाने- इति पात्रं संपूज्य। विष्णु
मलकरजनीत्रयं बिल्वफलतदर्द्धतदर्धकुशोदकपत्र-
पूर्णा अर्द्धपात्रं निक्षिप्य ओं ह्रीं आत्मशान्त्यै नमः।
अग्ने। ओं ह्रीं यिच्छाशान्त्यै नमः। नैऋते ओं ह्रीं
18a .. आ शान्त्यै नमः। वायव्ये- ओं ह्रीं पराशान्त्यै नमः।
ईशाने इत्यभ्यर्च्य- धूपदीपं कुर्यात। नैवेद्यं श्रीं उच्चार्य
गोमयादि प्रदक्षिण क्रमेण वायव्यानां मध्यपात्रेण कुर्यात
ओं ह्रीं सृष्टिस्थिति लयेन्नमः। इति मन्त्रं प्रोक्ष्य
स्नपनं विधाय। तद्दक्षिणपूर्वे शाल्यादि तण्डुलं सङ्क-
ल्प्य षोडशाख्यप्रमाणविस्तारं समचतुरस्राय अष्ट-
दलपद्मं लिखेत। मध्ये ऐं लिख्य।

सूत्रघटिकां स्थाप्य तोयामृत पूर्य त्रिदर्भकूर्च प्रतिमार-
न वस्त्र चित्र चूतपत्र नालिकेर पञ्चदर्भकूर्चं विधाय
गुरून् रेचककुंभक पूरक प्रमाणायां करन्यासभूत शुद्धि
अन्तर्यागं कृत्वा -

"वराभयाङ्कुशं पाशं सुप्रसन्नं त्रिभाङ्गिकम् ।
दाडिमी कुसुमसङ्काशं सर्वाभरण भूषितम् ॥
शिवलिङ्ग महादेवी गौरीञ्च वीरशक्तिषु ॥"

18b इति ध्यात्वा आवाहयेत् । ओं ह्रीं अंबिकायै नमः ।
ओं ह्रीं गणांबिकायै नमः । ओं ह्रीं गंगायै नमः । ओं
ह्रीं गौर्यै नमः । ओं ह्रीं मनोन्मन्यै नमः । ओं ह्रीं सरस्व
त्यै नमः । ओं ह्रीं महालक्ष्म्यै नमः । इत्यभ्यर्च्य
षडङ्गमभ्यर्च्य आवाहनादि अष्टमुद्रां प्रदर्श्य

नैवेद्यं सङ्कल्पय पुण्याहं प्रोक्ष्य विघ्नेश्वरादि द्वारपूजां करिष्ये ।

गर्भगृह श्रुतिश्चैव आधारशैल शैलमादिषु ।
लिङ्गमूर्ध्न्येन्त रुद्रांशं तिथिपूजा शिवप्रिये ॥
लोकास्समस्तजीवश्च राजराष्ट्राभिवृद्धिदम ।
मम वंशाभिवृद्धिश्च रक्षा रक्षा महेश्वरा ॥
योगालिङ्गश्च शान्तिश्च पञ्चमूर्ति विवर्जयेत ।
वेदागमेषु शास्त्रेषु बुद्धिमान देशिकोत्तम: ॥

॥ विशेषतर्पणम ॥

19a ततश्च पुनराचम्य पाण्यग्रेण गुरूत्तम: ।
ब्रह्मादि पञ्चकं साङ्गं मूलं विद्येश्वरानपि ॥
तत्वान अधिपतीन सर्वान ध्यायन कालान्तमण्डले ।

चतुर्थ्यन्ताभिधानेन स्वाहान्तेन तु तर्पयेत। ततो यज्ञो
पवीतेन मुनीन् कण्ठावलंबिनान् ॥
सनकादीन् स भृग्वादीन् सगोत्रप्रवरान्वितान्।
कनिष्ठामूलमार्गेण भूतादीन् पर्वसन्धिभिः ॥
ततोपसव्येन पितॄन् स पत्निकान् पितामहान्।
प्रपूर्वांश्च गुरूनेव चोतकान् बोधकान् परान् ॥
भ्रातॄन् सखीनुपाध्यायान् स मातामह मातुलान्।
स्वधान्तेनाभिधानेन नमोन्तेन तु तर्पयेत ॥

20 a ॥ विशेषसन्धिः ॥

ओं हों ईशानमूर्धाय स्वाहा। ओं हां तत्पुरुषवक्त्राय-
स्वाहा। ओं हूं अघोरेश्य स्वाहा। ओं हीं वामदेवाय स्वा-
हा। ओं हूं सद्योजाताय स्वाहा। ओं हां हृदयाय स्वाहा

ओं ह्रौं शिरसे स्वाहा। ओं ह्रूं शिखायै स्वाहा। ओं ह्रैं
कवचायै स्वाहा। ओं ह्रौं नेत्रश्य स्वाहा। ओं ह्रः
अस्त्रायै नमः। ओं ह्रां ह्रौं महागौर्यै स्वाहा। ओं ह्रीं
वामायै स्वाहा। ओं ह्रौं ज्येष्ठायै स्वाहा। ओं ह्रौं रौ-
द्र्यै स्वाहा। ओं ह्रौं काळ्यै स्वाहा। ओं ह्रौं कलविक-
रण्यै स्वाहा। ओं ह्रौं बलविकरण्यै स्वाहा। ओं ह्रौं
बलप्रमथिन्यै स्वाहा। ओं ह्रौं सर्वभूतदमन्यै स्वाहा।
ओं ह्रौं मनोन्मन्यै स्वाहा। ओं ह्रौं शिवतत्वायै स्वाहा।
शिवतत्वाधिपतये ओं ह्रौं शिवायै स्वाहा। ओं ह्रौं
शक्तितत्वायै स्वाहा। शक्तितत्वाधिपायै ओं ह्रौं शक्त्यै
स्वाहा। ओं ह्रौं सदाशिवतत्वायै स्वाहा। सदाशिव-
२०b तत्वाधिपतये ओं ह्रौं ब्रह्मणे स्वाहा। ओं ह्रौं ईश्वरतत्वा-
धिपाय स्वाहा।

ईश्वरतत्वाधिपतये ओं ह्रीं अनन्ताय स्वाहा। ओं ह्रीं शुद्ध
विद्यातत्वायै स्वाहा। शुद्धविद्यातत्वाधिपतये ओं ह्रीं शं-
कराय स्वाहा। ओं ह्रीं मायातत्वायै स्वाहा। मायातत्वाधि-
पतये ओं ह्रीं गहनेशाय स्वाहा। ओं ह्रीं कालतत्वाधि
पतये स्वाहा। कालतत्वाधिपतये ओं ह्रीं कालनाम्ने स्वाह
ओं ह्रीं नियति तत्वायै स्वाहा। नियति तत्वाधिपतये ओं
ह्रीं नियामकाय स्वाहा। ओं ह्रीं कलातत्वायै स्वाहा।
कलातत्वाधिपतये ओं ह्रीं ज्ञानबिन्दवे स्वाहा। ओं ह्रीं
विद्यातत्वायै स्वाहा। विद्यातत्वाधिपतये ओं ह्रीं वेदविज्ञा
नाय स्वाहा। ओं ह्रीं रागतत्वायै स्वाहा। रागतत्वाधिपतये
ओं ह्रीं कामदाय स्वाहा। ओं ह्रीं पुरुषतत्वायै स्वाहा।
पुरुषतत्वाधिपतये ओं ह्रीं सूक्ष्मदेहाय स्वाहा। ओं ह्रीं

प्रकृति तत्वायै स्वाहा। प्रकृतितत्वाधिपतये ओं ह्रीं प्रधा-
नकाय स्वाहा। ओं ह्रीं गुदतत्वायै स्वाहा। गुदतत्वा-
धिपतये ओं ह्रीं निदेहायै स्वाहा। ओं ह्रीं बुद्धितत्वायै
स्वाहा। बुद्धितत्वाधिपतये ओं ह्रीं बुद्धाय स्वाहा।
21 a ओं ह्रीं अहंकारतत्वायै स्वाहा। हंकारतत्वाधिपतये
ओं ह्रीं हंकृते स्वाहा। ओं ह्रीं मनस्तत्वायै स्वाहा।
मनस्तत्वाधिपतये ओं ह्रीं संकल्पाय स्वाहा। ओं ह्रीं
श्रोत्रतत्वायै स्वाहा। श्रोत्रतत्वाधिपतये ओं ह्रीं व्योम-
चाराय स्वाहा। ओं ह्रीं त्वक् तत्वायै स्वाहा। त्वक् तत्वा-
धिपतये ओं ह्रीं सर्वांगाय स्वाहा। ओं ह्रीं चक्षुस्तत्वायै
स्वाहा। चक्षुस्तत्वाधिपतये ओं ह्रीं प्रकाशाय स्वाहा।
ओं ह्रीं जिह्वातत्वायै स्वाहा। जिह्वातत्वाधिपतये ओं
ह्रीं महावक्त्राय स्वाहा।

ओं ह्रीं नासातत्वायै स्वाहा। नासातत्वाधिपतये ओं ह्रीं
विलंबकाय स्वाहा। ओं ह्रीं वाक्तत्वायै स्वाहा। वाक्-
तत्वाधिपतये ओं ह्रीं विभवे स्वाहा। ओं ह्रीं पादतत्वायै
स्वाहा। पादतत्वाधिपतये ओं ह्रीं रमणाय स्वाहा। ओं ह्रीं
पाणितत्वायै स्वाहा। पाणितत्वाधिपतये ओं ह्रीं साम-
गाय स्वाहा। ओं ह्रीं पायुतत्वायै स्वाहा। पायुतत्वाधि-
पतये ओं ह्रीं तूर्णकृते स्वाहा। ओं ह्रीं उपस्थतत्वा-
21b यै स्वाहा। उपस्थतत्वाधिपतये ओं ह्रीं घनानन्दाय
स्वाहा। ओं ह्रीं शब्दतत्वायै स्वाहा। शब्दतत्वाधिपतये
शब्दतत्वाधिपतये ओं ह्रीं सूक्ष्मनादाय स्वाहा।
ओं ह्रीं स्पर्शतत्वाधिपायै स्वाहा। स्पर्शतत्वाधिपतये
ओं ह्रीं बलवत्तरायै स्वाहा। ओं ह्रीं रूपतत्वायै स्वाहा।

ओं ह्रीं रूपतत्वायै स्वाहा। रूपतत्वाधिपतये ओं ह्रीं
भानुमते स्वाहा। ओं ह्रीं रसतत्वायै स्वाहा। रसतत्वा-
धिपतये ओं ह्रीं जलदायै स्वाहा। ओं ह्रीं गन्धतत्वायै
स्वाहा। गन्धतत्वाधिपतये ओं ह्रीं गन्धांगाय स्वाहा।
ओं ह्रीं आकाशतत्वायै स्वाहा। आकाशतत्वाधिपतये ओं
ह्रीं सूक्ष्माय स्वाहा। ओं ह्रीं वायुतत्वायै स्वाहा। वायुतत्वा-
धिपतये ओं ह्रीं मातरिश्वने स्वाहा। ओं ह्रीं अग्नितत्वायै
स्वाहा। अग्नितत्वाधिपतये ओं ह्रीं श्रीकण्ठायै स्वाहा। ओं
ह्रीं जलतत्वायै स्वाहा। जलतत्वाधिपतये ओं ह्रीं जलेशा-
यै स्वाहा। ओं ह्रीं पृथिवीतत्वायै स्वाहा। पृथिवीतत्वाधि-
पतये ओं ह्रीं श्रीकण्ठाय स्वाहा। ओं ह्रीं आदित्येश्य स्वाहा।
ओं ह्रीं वसुश्य स्वाहा। ओं ह्रीं रुद्रेश्य स्वाहा।

ओं ह्रीं विश्वेश्य स्वाहा। ओं ह्रीं सार्द्धेश्य स्वाहा। ओं ह्रीं मरुद्भ्य स्वाहा। ओं ह्रीं भृगुश्य स्वाहा। ओं ह्रीं अङ्गि-रेश्य स्वाहा। कण्ठोपवीति। ओं ह्रीं आत्रे नमः।
22a ओं ह्रीं वसिष्ठाये नमः। ओं ह्रीं विलस्त्याय नमः। ओं ह्रीं कृतये नमः। ओं ह्रीं भारद्वाजाय नमः। ओं ह्रीं विश्वामित्राय नमः। ओं ह्रीं प्रचेतसे नमः। ओं ह्रीं ऋ-द्याय नमः ओं ह्रीं अगस्त्याय नमः। ओं ह्रीं दधी-चाय नमः। ओं ह्रीं दुर्वासते नमः। इत्येकादश ऋषीन ओं ह्रीं सनकाय वौषट्। ओं ह्रीं सनन्दाय वौषट्। ओं ह्रीं सनातनाय वौषट्। ओं ह्रीं सनत्कुमाराय वषट्। ओं ह्रीं कपिलाय वौषट्। ओं ह्रीं पञ्चशिखाय वौषट्। ओं ह्रीं ऋभवे वौषट्। इति सप्तमनुष्यान्। ओं ह्रीं

सर्वेभ्यो भ्रातृभ्यो वौषट्। ओं ह्रीं काश्यपाय नमः।
ओं ह्रीं वत्साय नमः। ओं ह्रीं नैध्रुवाय नमः। अथ दक्षि-
णस्कन्धोपवीति। ओं ह्रीं कव्यवाहनाय स्वधा ओं ह्रीं
अनलाय स्वधा। ओं ह्रीं सोमपाय स्वधा। ओं ह्रीं यमा-
य स्वधा। ओं ह्रीं अर्यम्ने स्वधा। ओं ह्रीं बर्हिषिभ्य-
स्वधा। ओं ह्रीं आज्यपाय स्वधा। इति देवपितॄन्। ओं
ह्रीं ईशानाय पित्रे स्वधा। ओं ह्रीं सदाशिवाय पिता-
महाय स्वधा। ओं ह्रीं शान्ताय प्रपितामहाय स्वधा।
इति विशेषपितॄन्। ओं ह्रीं पितृभ्य स्वधा। ओं ह्रीं पि-
तामहेभ्य स्वधा। ओं ह्रीं प्रपितामहेभ्य स्वधा। ओं ह्रीं
22b मातृभ्य स्वधा। ओं ह्रीं पितामहीभ्य स्वधा। ओं ह्रीं प्र-
पितामहीभ्य स्वधा। ओं ह्रीं सर्वेभ्यो भ्रातृभ्य स्वधा।

ओं ह्रीं सर्वेभ्यो पितृव्येभ्य स्वधा। ओं ह्रीं सर्वेभ्यो-
मातुलेभ्य स्वधा। ओं ह्रीं सर्वेभ्यो चोदकेभ्य स्वधा।
ओं ह्रीं सर्वेभ्यो बोधकेभ्य स्वधा। ओं ह्रीं सर्वेभ्यो
गुरुभ्य स्वधा। ओं ह्रीं सर्वेभ्यो आचार्येभ्य स्वधा।
इति तर्पयित्वा आचम्य अ. रेणा एकविंशति
वारं जप्त्वा इति विशेष सन्धि: समाप्त:।

श्री गुरुभ्यो नम:।

copied by
M.S. Ramamoorthy
25/7/66.